हि, व्य, हेतुः। (यथा, शाकुन्तले। १ अङ्के।
"असंशयं क्षत्रपरिग्रहक्षमा
यदार्य्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु
प्रमाणमन्तःकरणप्रवृत्तयः॥")
अवधारणम्। इत्यमरः।३।४।२५६ ; ३।४।५॥
पादपूरणम्। विशेषः। प्रश्नः। (यथा, रामायणे। २।६४।३०।
"नाभिवादयसे माद्य न च मामभिभाषसे।
किञ्च शेषे तु भूमौ त्वं वत्स! किं कुपितो
ह्यसि॥")
हेत्वपदेशः। सम्भ्रमः। असूया। इति मेदिनी॥
शोकः इति शब्दरत्नावली॥
हिंसकः, पुं, (हिनस्ति तच्छीलः। हिंस+ण्वुल्।)
हिंस्रपशुः। अथर्व्ववित्ब्राह्मणः। शत्रुः। इति
शब्दरत्नावली॥
हिंसकः, त्रि, (हिंस+ण्वुल्।) हिंसाकर्त्ता।
तत्पर्य्यायः। घातुकः २ हिंस्रः ३ शरारुः ४
हन्ता ५। इति शब्दरत्नावली॥ स चाष्टविधः।
यथा,—
"भोक्तानुमन्ता संस्कर्त्ता क्रयिविक्रयिहिंसकाः।
उपहर्त्ता घातयिता हिंसकाश्चाष्टधाधमाः॥"
इति काशीखण्डम्॥ * ॥
साध्वीभार्य्यादिहिंसने दोषो यथा,—
"भार्य्यां प्रियसखीं यस्तु साध्वीं हिंसति निर्घृणः।
न तेऽमृतं प्राप्नुवन्ति हिंसका दुष्टयोनिजाः॥"
इति वाराहे ब्राह्मणदोषाश्रुतनामाध्यायः॥ * ॥
शरणागतादिहिंसकस्य अध्ययहार्य्यत्वं यथा,—
"शरणागतबालस्त्रीहिंसकान् संवसेन्न तु।
चीर्णव्रतानपि सदा कृतघ्नसहितानिमान्॥"
इति प्रायश्चित्ततत्त्वधृतयाज्ञवल्क्यवचनम्॥
हिंसा, स्त्री, (हिंसनमिति। हिंस+अः। टाप्।)
घातः। इति मेदिनी॥ चौर्य्यादिकर्म्म। यथा।
हिंसा चौर्य्यादिकर्म्म च। इत्यमरः।३।३।२१८॥
चौरस्य कर्म्म चौर्य्यं आदिना बन्धनताड़नवृत्ति-
नाशनाशादि च चकाराद्वधोऽपि हिंसा। इति
तट्टीकायां भरतः॥ * ॥ हिंसिते प्रतिहिंसायां
दोषाभावो यथा,—
"कृते प्रतिकृतं कुर्य्यात् हिंसिते प्रतिहिंसितम्।
न तत्र दोषं पश्यामि दुष्टे दोषं समाचरेत्॥"
इति गारुड़े। ११५। ४७॥
विष्णुभक्तानां ब्राह्मणादीनाञ्च हिंसाकर्त्तुरचिरान्नाशो यथा,—
"दुष्टा यदा मे भक्तानां ब्राह्मणानां गवामपि।
क्रतूनां देवतानाञ्च हिंसां कुर्व्वन्ति निश्चितम्।
तदाचिरन्ते नश्यन्ति यथा वह्नौ तृणानि च॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे।६।६१-६२॥
पशुहिंसानिषेधो बलिशब्दे द्रष्टव्यः॥ * ॥ अथ
वैधहिंसाविचारः। मा हिंस्यात् सर्व्वा भूतानि
इत्यत्र सर्व्वशब्दस्य व्यापकार्थपरतया एतद्विधि-
मनुसृत्य। वायव्यं श्वेतमालभेत। इत्यादिविधे-
र्विषयाप्राप्तेरगत्या वैधातिरिक्तविषयत्वम्।
सर्व्वाः सर्व्वाणि छन्दसि वेत्यनेन तत् पदं सिद्धम्।
यदपि नागादर्शनटीकाकृद्भिर्वाचस्पतिमिश्रै-
स्तत्त्वकौमुद्यां अभिहितम्। न च मा हिंस्यात्
सर्व्वा भूतानि इति सामान्यशास्त्रं विशेषशास्त्रे-
णाग्नीषोमीयं पशुमालभेत् इत्यनेन बाध्येत इति
वाच्यं विरोधाभावात् विरोधे हि बलीयसा दुर्ब्बलं
बाध्यते। न चास्ति विरोधः भिन्नविषयत्वात्।
तथा हि मा हिंस्यादिति निषेधेन हिंसाया
अनर्थहेतुभावो ज्ञाप्यते न पुनरक्रत्वर्थमपि।
न चानर्थहेतुत्वक्रतूपकारकत्वयोः कश्चिदस्ति
विरोधः। हिंसा हि पुरुषस्य दोषमावक्ष्यति
क्रतोश्च उपकरिष्यतीत्यन्तेन। तदपि सांख्य-
नये। मीमांसकमते तु विरोध एव। तथा हि।
गुरुनये न खलु सर्व्वभूतहिंसाभावविषयकं
कार्य्यं इति निषेधविध्यर्थस्य वाचं विना अग्नी-
षोमीयपश्वालम्भनविषयकं कार्य्यं इति भाव-
विध्यर्थं उपपद्यते। भट्टनये तु अस्तु यथा
तथास्तु। न च मुख्यपशुयागे पुरुषार्थे पशु-
हिंसनस्यार्थसाधनत्वमनर्थसाधनत्वञ्चोपपद्यते
विरोधात् वस्तुतस्तु अङ्गेऽपि विरोधोऽस्त्येव
कुतो विधेरेव स्वभावो यः स्वविषयस्य साक्षात्
परम्परया वा पुरुषार्थसाधनत्वमवगमयति
अन्यथा अङ्गानां प्रधानोपकारकत्वमपि नाङ्गी-
क्रियते। अर्थसाधनत्वं बलवदनिष्टाननुबन्धीष्ट-
साधनत्वम्। अनर्थसाधनत्वं बलवदनिष्टासाधन-
त्वम्। न चानयोरेकत्र समावेश इति। अत-
एवोक्तं तस्मात् यज्ञे वधोऽवध इति। नन्वेवं
श्येनेनाभिचरन् यजेत इत्यत्र श्येनस्य शत्रुवध-
रूपेष्टसाधनत्वमवगतं अभिचारो मूलकर्म्म चेति
मनुना उपपातकगणनमध्ये पाठात् अनिष्ट-
साधनत्वमवगतं तदेतत् कथमुपपद्यतामिति
चेन्नैवम्। आततायिनमयान्तं हन्यादेवाविचा-
रयन् इत्येकवाक्यतया आततायिस्थले इष्टसाध-
नत्वम्। अनाततायिस्थले तूपपातकत्वेन बल-
वदनिष्टसाधनत्वम्। इत्यविरोध इति। गुरु-
चरणा अप्येवम्। इति तिथ्यादितत्त्वम्॥ * ॥
ब्राह्मणस्य हिंसानिषेधो यथा,—
"हिंसा चैव न कर्त्तव्या वैधहिंसा तु राजसी।
ब्राह्मणैः सा न कर्त्तव्या यतस्ते सात्त्विका
मताः॥"
इति श्राद्धविवेकटीकायां गोविन्दानन्दधृत-
बृहन्मनुवचनम्॥
हिंसाकर्म्म, [न्] क्लो, (हिंसाप्रधानं कर्म्म।)
अथर्व्ववेदोक्तमन्त्रयन्त्रादिनिष्पादितमारणोच्चा-
टनादि। तत्पर्य्यायः। अभिचारः २। इत्य-
मरः। ३। २। १९॥
हिंसारुः, पुं, (हिनस्तीति। हिंस+आरुः।)
व्याघ्रः। इति त्रिकाण्डशेषः॥
हिंसालुः, त्रि, अधमशीलः। घातुकः। हिंसधातो-
रालुप्रत्ययेन निष्पन्नः॥
हिंसालुकः, पुं, (हिंसालु+स्वार्थे संज्ञायां वा
कन्।) हिंसाशीलकुक्कुरः। यथा,—
"हिंसालुकः स्वादुकः स्या योगिनोऽलर्क
इष्यते।"
इति हारावली॥
हननशीले, त्रि॥
हिंसितः, त्रि, (हिंस+क्तः।) हिंसाप्राप्तः।
यथा,—
"यस्तु भागवतान् दृष्ट्वा भूत्वा भागवतः क्वचित्।
अभ्युत्थानं न कुर्व्वीत अहं तेनापि हिंसितः॥
यस्तु कन्यां पिता दत्त्वा न प्रयच्छति तां पुनः।
अष्टौ पितृगणास्तेन हिंसिता नात्र संशयः॥"
इति वाराहे ब्राह्मणदोषाश्रुतनामाध्यायः॥
हिंसीरः, पुं, (हिनस्तीति। हिन्स+"हिंसेरी-
रन्नीरचौ।" उणा० ५। १८। इति ईरन्।)
व्याघ्रः। खले, त्रि। इति उणादिवृत्तिः॥
हिंस्रः, त्रि, (हिनस्तीति। हिंस+"नमि-
कम्पीति।" ३। २। १६७। इति रः।)
हिंसाशीलः। तत्पर्य्यायः। शरारुः २ घातुकः
३। इत्यमरः। ३। १। २८॥ हिंसकः ४
हन्ता ५। इति शब्दरत्नावली॥ शार्व्वरः ६।
इति जटाधरः॥ * ॥ हिंस्राणां हिंसने दोषा-
भावो यथा,—
"कृपा कार्य्या सतां शश्वदहिंस्रेषु च जन्तुषु।
हिंसायां न हि दोषश्च हिंस्राणाञ्च ब्रजेश्वर!॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५ अध्यायः।
हिंस्रः, पुं, (हिनस्तीति। हिंस+रः।) घोरः।
भीमसेनः। हरः। इत्युणादिकोषः॥
हिंस्रकः, पुं, (हिंस्र एव। कन्।) हिंस्रपशुः।
इति शब्दरत्नावली॥
हिंस्रपशुः, पुं, (हिंस्रः) पशुः।) हिंसकजन्तुः।
तत्पर्य्यायः। व्याड़ः २ हिंस्रकः ३ हिंसकः ४
श्विविः ५। इति शब्दरत्नावली॥ श्वापदः ६।
इति त्रिकाण्डशेषः॥
हिंस्रा, स्त्री, (हिनस्तीति। हिंस+रः। टाप्।)
एलावली। काकादनी। मांसी। जटामांसी।
इति मेदिनीकरहेमचन्द्रौ॥ गवेडुका। गवे-
धुका। नाड़ी। शिरा। इति शब्दचन्द्रिका॥
हिक्क, अ कूजे। इति कविकल्पद्रुमः॥ (भ्वा०-
उभ०-अक०-सेट्।) कोपधः। अ, हिक्कति
हिक्कते। कूजोऽव्यक्तशब्दः। हिक्कायामिवाय-
मिति भट्टमल्लः। हिक्कति लोकः। इति दुर्गा-
दासः॥
हिक्क, क ङ हिंसे। इति कविकल्पद्रुमः॥ (चुरा०-
आत्म०-सक०-सेट्।) कोपधः। क ङ, हिक्क-
यते। इति दुर्गादासः॥
हिक्का, स्त्री, (हिक्क कूजे+गुरोश्चेत्यः। टाप्।
यद्वा, हिक्कतेऽनयेति। हिक्क+करणे घञ्।)
रोगोपसर्गविशेषः। हिंचकी इति भाषा।
इत्यमरः। २। ६। ८॥ हेंकटी इति ख्याती
व्याधिविशेषः। हिक्कति कूजत्यनया हिक्का।
हिक्क अ कूजे सेमक्षात् सरोरिति अः। हिक्क-
यते हिनस्तीति वा। हिक्क क ङ हिंसे पचा-
दित्यादम्। हिगिति कृत्वा कायति शब्दायते